# Shri Maharajni Stotram 2 Maharajni Stavaraja

# श्रीमहाराज्ञीस्तोत्रम् २ महाराज्ञीस्तवराजः

## Document Information

Text title : Maharajni Stotram 2 Maharajni Stavarajah

File name : mahArAjnIstotram2.itx

Category : devii, otherforms, devI, stavarAja

Location : doc_devii

Transliterated by : Harmander Singh

Proofread by : Harmander Singh

Latest update : August 18, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 19, 2024

*sanskritdocuments.org*

# श्रीमहाराज्ञीस्तोत्रम् २ महाराज्ञीस्तवराजः

ॐ श्रीभैरव उवाच ।
अधुना कथयिष्यामि स्तोत्रराजं परात्परम् ।
मूलमन्त्रमयं दिव्यं तत्त्वभूतं मनोहरम् ॥

राज्ञीप्रियं पापहरं लक्षपूजाफलप्रदम् ।
जपलक्षसमं स्तोत्रं ध्यानकोटिसमं प्रिये ॥

राज्ञीस्तोत्रस्य देवेशि ब्रह्मा ऋषिरुदाहृतः ।
गायत्री छन्द इत्युक्तं श्रीराज्ञी देवतेरिता ॥

माया बीजं परा शक्तिः कामः कीलकमीश्वरि ।
भोगापवर्गसिद्ध्यर्थे विनियोगः प्रकीर्तितः ॥

ॐ अस्य श्रीमहाराज्ञीस्तवराजस्य श्रीब्रह्मात्रृषिः ।
गायत्री छन्दः, श्रीमहाराज्ञी भूतेश्वरी देवता,
ह्रीं बीजं, सौः शक्तिः, क्लीं कीलकं,
आत्मनो आत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं
श्रीमहाराज्ञीप्रसादद्वारा भोगापवर्गसिद्ध्यर्थे,
पाठे विनियोगः ॥

ध्यानम् ।
उद्यद्दिवाकरसहस्ररुचिं त्रिनेत्रां
सिंहासनोपरिगतामुरगोपवीताम् ।
खड्गाम्बुजाढ्यकलशामृतपात्रहस्तां
राज्ञीं भजामि विकसद्वदनारविन्दाम् ॥

तारमिन्दुकलिकावतंसितं
वेदसागरमणिं मनोहरम् ।
यो जपेदुषसि रत्नमालया

राज्यमाशु लभते स साधकः ॥ १॥

भूतिमिन्दुनवबिम्बमण्डितां
नादविन्दुललितां जपेत्तु यः ।
वारमेकमुरुवारणस्थितो
जेष्यति स्मयमयानऽरीन्त्रणे ॥ २॥

रसां जपेद्यो भुवनेशि मन्त्री
त्वन्मन्त्रमध्ये मदनोपतप्तः ।
रम्भां समालिङ्ग्य विमानचारी
लीलां भजेन्नन्दनवाटिकायाम् ॥ ३॥

वह्निबीजमणिमाद्यसिद्धिदं
बिन्दुबिम्बशशिखण्डमण्डितम् ।
यो जपेन्निशि धनाभिलाषवान्
स क्षणाद्भवति वित्तदोपमः ॥ ४॥

कामराजममराभिवन्दितं यो
जपेन्निधुवनेऽक्षमालया ।
तस्य यान्ति वशतां सुराङ्गनाः
किं पुनर्जगति भूभृदङ्गनाः ॥ ५॥

शक्तिं भक्त्या यो जपेच्छक्तिपूजा-
काले कालीपादपद्मार्पितान्तः ।
नक्तं तस्य स्मेरववक्त्रा घृताची
वश्या वेश्या स्वर्गता वा शची च ॥ ६॥

भगवत्यै तथा राज्ञ्यै नाममन्त्रमिति स्मरेत् ।
यो देवि तस्य वश्याः स्युर्भैरवस्याष्टसिद्धयः ॥ ७॥

मायां नमोन्ते यदि साधकेन्द्रो
जपेन्महेशानि शिवालयस्थः ।
तत्रैव देवीं परमार्थराज्ञीं
पश्येत्स सद्यो वरसिद्धिदात्रीम् ॥ ८॥

ठद्वयं यदि जपेन्निशाक्षये
क्षीरभुक् स्वतटिनीतटस्थितः ।

जिष्णु विष्णुकमलासनेश्वरा
यान्ति देवि वशतां तदा क्षणात् ॥ ९॥

भूगेहवृत्तत्रयनागपत्र-
षडारयोन्यश्रकबिन्दुबिम्बे ।
निषेदुषीं राजकुलाधिदेवीं
राज्ञीं भजे राजकलावतंसाम् ॥ १०॥

देवि श्रीभूतधात्रीप्रवरगुणमये
निष्कले निर्गुणे मे माये मातः शरण्ये
गिरिवरतनये चिन्मये तत्त्वरूपे ।
दुर्गे चण्डि प्रमाथे त्रिपुरविजयिनि
स्मेरवक्त्रे वरेण्ये कारुण्याढ्ये प्रशस्ते
सुरदितिजनुते राज्ञि वै त्वं प्रसीद ॥ ११॥

इति स्तोत्रं मन्त्रस्फुरणकरुणानन्दनिलयं
पठेद्भक्त्या प्रातस्तव गिरिसुते योगनिलयम् ।
भवेत्सद्यो भूमौ नृपमुकुटनीराजितपदो-
ऽमृतो मुक्तिं वान्ते तव भवनमाप्नोति वरदे ॥ १२॥

इति राज्ञ्याः परं तत्त्वं पञ्चाङ्गमखिलं शिवे ।
सर्वस्वं च रहस्यं च सर्वसारस्वनप्रदम् ॥ १३॥

आनन्दवर्धनं गुह्यं परमैश्वर्यकारणम् ।
भोगापवर्गदं पुण्यं दारिद्र्यभयनाशनम् ॥ १४॥

राज्यप्रदं भक्तिकरं सर्वशत्रुनिबर्हणम् ।
पञ्चाङ्गमखिलं देव्या न वक्तव्यं दुरात्मने ।
तव भक्त्या मया ख्यातं गोपनीयं प्रयत्नतः ॥ १५॥

इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये श्रीमहाराज्ञीस्तवराजः ॥

श्रीमहाराज्ञीस्तोत्रम्

*Shri Maharajni Stotram 2 Maharajni Stavaraja*

pdf was typeset on August 19, 2024

Please send corrections to *sanskrit@cheerful.com*